# ॥ मङ्गलाशासनानि ॥

## MAṄGALĀŚĀSANAS:
## Blessings of the Ācāryas in Original Saṁskṛt

## ॥ श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण
यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ
तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य
व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक
सर्वतन्त्रस्वतन्त्रादिराजधानी विद्यानगरमहाराजधानी कर्णाटकसिंहासनप्रतिष्ठापनाचार्य
श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि
श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामिगुरुकरकमलसञ्जात

## ॥ श्री जगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थमहास्वामिभिः ॥

### । श्रीविद्याशङ्कर ।

निखिलास्तिकमहाजनेषु नारायणस्मरणपूर्वकं विरचिता आशिषस्समुल्लसन्तु । इह खलु श्रेयोऽर्थिनां नराणां धर्मानुष्ठानमेव परमं साधनम्। स च धर्मः अरोगदृढगात्रेणैवानुष्ठातुं शक्यः। तत्रारोगता दृढगात्रता च युक्ताहारविहारवत एव सम्भवति। अनश्नन् अत्यन्तमश्नंश्च धर्माचरणे अक्षमो भवति । तदुक्तं भगवता 'नात्यश्नतस्तु योगोऽस्ति नचैकान्तमनश्नतः' इत्यादिना। तदेव हितमितमेध्याशनं तप इति योगशास्त्रविदस्संगिरन्ते। तत्राहारो मुख्यतया अन्नशब्देनाभिधीयते। तस्य चान्नस्य वैशिष्ट्यं श्रुत्यैव 'अन्नं न निन्द्यात्, अन्नं न परिचक्षीत, अन्नं बहु कुर्वीत' इत्यादिना बहुधा प्रत्यपादि। अत अन्नस्य सम्यगुत्पादनं तस्य सम्यग्विनियोगश्च लोकानां हितायैव भवतः। इमं विषयं परित्यज्य विषयान्तरेषु परिश्रमः 'किमस्त्यनुपनीतस्य वाजपेयादिभिर्मखै' रिति न्यायमनुधावति।

अधुना **समाजनीति समीक्षण केन्द्र** नाम्नी संस्था अन्नस्य महिमानं लोकानवबोधयितुं **अन्नं बहु कुर्वीत** इति नाम्ना ग्रन्थमेकं प्रकाशयति, अस्मिन्नेव विषये काञ्चन गोष्ठीमपि

प्रविवर्तयिषति यस्यां बहवो विद्वांसः नैके मठाधीशाः विशिष्टाः पुरुषाश्च समवेत्य चर्चां विधाय लोकानां चेतस्सु अन्ने श्रद्धामुत्पादयिष्यन्ति।

वयमपीमां कार्यप्रणालीमवगत्य मोदामहे। संस्थेयं श्रीशारदाचन्द्रमौलीश्वरयोः कृपापूरेण संकल्पितकार्यनिर्वहणे विशिष्टां शक्तिमवाप्नोतु, गोष्ठी चेयं निष्प्रत्यूहं सम्पद्यतामिति चाशास्महे।

शृङ्गगिरिः
धातृवत्सरीय वैशाखकृष्णदशमी भानुवासरः
१२.५.१९९६

**इति नारायणस्मरणम्**
**श्री**

श्रीः

श्रीमते रामानुजाय नमः

# श्रीमत् परमहंस

# ।। श्री कलियन् वानमामलै रामानुज जीयर् स्वामिगल् ।।

## श्री वानमामलै मठम्

## नाङ्गुनेरि

### अभिनन्दनपत्रम्

।। स्वस्ति श्रीर्दिशतात् ।। ११.३.९६ तमे दिने द्वौ भौतिकशास्त्रप्राचार्यौ अर्थशास्त्रप्राचार्यश्चैकइति त्रयो विवेकिनः प्राज्ञा अत्रास्मदीय श्रीमठमागतवन्तश्चिरमस्माभिस्सम्भाषणसौख्यमनुभूतवन्तश्च। ते चासन् -- क्रमशः श्री जितेन्द्र बजाजाभिधेयः प्राचार्यः, श्री मण्डयम् दोड्डमने श्रीनिवासार्यनामा प्राचार्यस्तथा श्रीवरदराजार्यनामधेयः प्राचार्यः कीर्तिमूर्तीनां सुप्रसिद्धविद्वद्वरिष्ठानां श्रीमदुभयवेदान्ताचार्य कारप्पङ्काडु श्रीवेङ्कटाचार्यस्वामिनां पुत्रमणिश्च। एते त्रयोऽपि **समाजनीति समीक्षण केन्द्र** नाम्नस्सङ्घादायातवन्तः। संवादोऽस्माकं सुविस्तृतः परमफलैर्ग्रहिश्च समपद्यत। तद्दिने तथा द्वाभ्यां भौतिकप्राचार्याभ्यां विरचितम् **अन्नं बहु कुर्वीत** इति शीर्षकभूषितं प्रचिकाशयिषितं पुस्तकरत्नं समर्पितमस्मभ्यम्।

पुस्तकरत्नमिदं सत्यामपि कार्यन्तरव्यापृतावस्माभिरामूलाग्रं समवेक्षितम्। अधुनास्माकमयं सुदृढो विश्वासः यदीदृशो ग्रन्थः प्रप्रथमं विरचितः प्रकाशमुपनीयमानोऽस्तीति। स्वकीयकेन्द्रस्य लक्ष्याण्यनुसृत्य नितरां विलक्षणया सरण्या ग्रन्थोऽयं विरचित आभ्यां प्राचार्याभ्यां बाभाति। ग्रन्थरचनायाः पूर्वं श्रुतिपुराणेतिहासग्रन्थानां बहूनां सम्यगालोडनं परिश्रमेण कृतवन्तावेतौ द्वावपि रचयिताराविति सुस्पष्टं भासते। कृष्णयजुर्वेदतैत्तिरीयोपनिषदि प्रतिपादितमन्नमाहात्म्यम् अन्नदानमाहात्म्यञ्च प्रधानतयावलम्ब्य 'अन्नं बहु कुर्वीत'

इत्यौपनिषदवाक्यमेव शीर्षकतया परिगृह्य परममनोहारिणा विषयविवेचन-वर्त्मना क्रमशोऽध्यायशस्सुसंवर्धितश्चकास्त्ययं ग्रन्थः । सन्दर्भानुसारेण भविष्यपुराणादिस्थश्श्वेतराजवृत्तान्तः इतरे च बहवस्समुचिता उदन्ताः श्रीरामायणीयाः महाभारतस्थाश्च सुनिपुणमुपपादिताः शतशश्च श्लोकास्समुद्धृताश्च विभान्त्यत्र ग्रन्थरत्ने । 'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव' इति तत्रैवा-तिथिसत्कारविषयस्तैत्तिरीयोपनिषदि यो वा दृष्टोऽस्ति, अस्मत्पुण्यभूमेर्भारतवर्षस्य सनातनसिद्धान्तोऽयमिति विषयं विवरीतुमतिबहवः पुराणेतिहासश्लोकास्समुद्धृता विलसन्ति। अत्रास्मद्द्राविड्यां वाण्यां सुप्रसिद्धसङ्घकालिकग्रन्थरत्ने 'तिरुक्कुरल्' नाम्नि यद्वा प्रतिपादितमस्ति तत्वं, स्मारयन्ति तस्य समग्रा अप्येते समुद्धृतश्लोकाः ।

'अतिथि' शब्द एवेदं बोधयति यत् यः कोऽपि वा समागच्छत्यस्मद् गृहद्वारे, तस्य पूर्वं स्वागमनाय तिथेस्समयस्य च सूचनमनावश्यकमिति । तादृश्यासीदस्माकं पुण्यभूमेः भारतस्य प्राचीनतमा संस्कृतिः । यदि वयं पूर्वतनयुगैराधुनिकस्यातिविवृद्धस्य वैज्ञानिकस्यापि युगस्य तुलनां कुर्मः, तर्हि वयं पश्यामोऽन्नोत्पादनविषये, प्रजानां पर्याप्तान्नलाभविषये च महानस्ति व्यत्यास इति । तथैवान्यैर्देशैस्तुलनायामपि वयं सम्पश्यामोऽपर्याप्तिमेव सुतराम् । इमानावश्यकान्विषयान्सम्यग्विवेचनपूर्वकं, प्रात्यक्षिकविश्लेषणपुरस्सरश्च ग्रन्थेऽस्मिन् श्रीबजाजमहोदयः श्रीश्रीनिवासार्यमहाभागश्च सुविस्तृतं प्रतिपादितवन्तौ ।

एवमिमं जीवनाधारभूतं, प्राचीनास्मदीयसंस्कृतिस्तम्भभूतश्च विषयमभूतपूर्वतया, प्रप्रथमतया च स्वीकृत्य ग्रन्थरत्नमिदं विरचितवन्तावेतौ द्वावपि प्राचार्यौ निश्चप्रचं परमप्रशंसनीय-प्रतिभाशालिनौ विभात इति हार्दमाचक्ष्महे । इयं कृतिमतल्लिका सर्वत्र प्रसृता समधीता च भूत्वा परमफलेग्रहिर्भूयादिति वयं सप्रेम समाशास्महे । प्रार्थयामहेचास्मत्कुलदैवतदिव्यदम्पत्योः श्रीवरमङ्गाम्बायाः श्रीदेवनायकविभोश्च पादपाथोरुहयुगलमूले यदेतौ द्वावपि ग्रन्थकर्तृमहानुभावौ सुचिरं जीवेताम् अथैतादृशसेवामस्माकं जन्मधरण्या भारतमहाराष्ट्रस्य बहुशः कुर्यातामिति च ।।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।।

नाङ्गुनेरि
१९.३.९६

**श्रीरामानुजन्**
श्रीकलियन् वानमामलै रामानुजजीयर् स्वामी

श्रीहरिः

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य
श्रीशङ्करभगवत्पादाचार्यपरम्परागत

# ॥ जगद्गुरु श्रीशङ्कराचार्य श्रीनिश्चलानन्द सरस्वती महाराज ॥

## श्रीगोवर्धनपीठ
## पुरी

'अन्नं बहु कुर्वीत' इति तैत्तिरीयोपनिषत् अन्नस्य प्रचुरोत्पादनं सञ्चयं वितरणञ्चोपदिशति। स्थूलदेहोपादानपञ्चमहाभूतानि अन्नमिति सञ्ज्ञायन्ते पञ्चदश्याम्। छान्दोग्यम् आहारोऽन्नमिति ब्रवीति। दार्शनिकदृष्ट्या अन्नादाख्यस्य भोक्तुर्भोग्यम् अर्थात् शेषपदार्थोऽन्नमित्यभिधीयते। सप्तान्नब्राह्मणे तु देवमनुष्यादिप्राणिभोग्यानि जीवोपभोग्यानि वस्तूनि अन्नमिति व्यवह्रियन्ते। पूर्वोक्तरीत्या दर्शपौर्णमासौ देवान्नम्, व्रीह्यादिकं मनुष्यान्नम्, वीरुधादिकं पश्वन्नम्, वाङ्मनःप्राणाश्च जीवान्नमिति सिद्ध्यति।

भारतीयमनीषिणो विविधलोकलोकान्तरस्थित स्वयंभूमनसिजजरायुजाण्डजोद्भिज्ज-स्वेदजप्राणिवर्गस्य भोग्यपदार्थमन्नं स्वीकुर्वन्ति। अमृतं वै देवानाम्, सुधा वै नागानाम्, स्वधा वै पितॄणाम्, वीरुधश्च पशूनाम्, व्रीह्यादयो वै मनुष्याणाम् अन्नम्, अन्नं वै प्राणाः सर्वेषाम्।

सर्वाणि चान्नानि जलात् प्रादुर्भवन्ति। श्रीमद्भागवते पृथुचरित्रमाध्यमेन पृथ्वीदोहन-प्रसङ्गे विविधान्नसम्बन्धिनी बृहन्मीमांसा समुपवर्णिता व्यासाचार्यैः। आपो वै सकलान्नानां मूलानि, आपो वै अन्नपोषकस्य सोमस्य अभिव्यञ्जकानि। तस्मादन्नदानस्य जलदानस्य च महत्त्वं विजयतेतराम्। देहत्यागानन्तरं दानवीराः दिव्यातिदिव्यान् लोकानधिगम्य यशस्विनो जायन्ते। आयुष्मन्तो धनवन्तश्च भवन्ति।

न तस्मात् परमं दानं किञ्चिदस्तीति मे मनः।
अन्नात् प्राणभृतस्तात प्रवर्तन्ते हि सर्वशः॥

तस्मादन्नं परं लोके सर्वलोकेषु कथ्यते ।
अन्नाद् बलं च तेजश्च प्राणिनां वर्धते सदा ।।

अन्ने दत्ते नरेणेह प्राणा दत्ता भवन्त्युत ।
प्राणदानाद्धि परमं न दानमिह विद्यते ।।

अन्नं वापि प्रभवति पानीयात् कुरुसत्तम ।
नीरजातेन हि विना न किञ्चित् सम्प्रवर्तते ।।

नीरजातश्च भगवान् सोमो ग्रहगणेश्वरः ।
अमृतं च सुधा चैव स्वाहा चैव स्वधा तथा ।
अन्नौषध्यो महाराज वीरुधश्च जलोद्भवाः ।
यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते ।
देवानाममृतं ह्यन्नं नागानां च सुधा तथा ।
पितॄणां च स्वधा प्रोक्ता पशूनां चापि वीरुधः ।।

अन्नमेव मनुष्याणां प्राणानाहुर्मनीषिणः ।
तच्च सर्वं नरव्याघ्र पानीयात् सम्प्रवर्तते ।
तस्मात् पानीयदानाद् वै न वरं विद्यते क्वचित् ।।

तच्च दद्यान्नरो नित्यं यदीच्छेद् भूतिमात्मनः ।
धन्यं यशस्यमायुष्यं जलदानमिहोच्यते ।
शत्रूंश्चाप्यधि कौन्तेय सदा तिष्ठति तोयदः ।।

सर्वकाममवाप्नोति कीर्तिं चैव हि शाश्वतीम् ।
प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते ।।

तोयदो मनुजव्याघ्र स्वर्गं गत्वा महाद्युते ।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः ।।

पुरी
२८.३.९६

**निश्चलानन्दः**

श्रीमन्नारायणरामानुजयतिभ्यो नमः

# ।। श्री श्री त्रिदण्डी श्रीमन्नारायण रामानुज जीयर् स्वामीजी ।।

## सीतानगरम्

## अभिनन्दनम्

### श्रीमते नारायणाय नमः
### अनेकानि मङ्गलाशासनानि

अवलोकितस्तत्र तत्र **अन्नं बहु कुर्वीत** इति शुभाख्यया शोभमानोऽयं निबन्धः। 'अन्नं बहु कुर्वीत' इति श्रुतिवचनमधिकृत्य विवरणरूपतया श्रीमद्भ्यां जितेंद्र बजाजुना, मण्डयम् दोड्डमने श्रीनिवासेन च संग्रथितोऽयं ग्रन्थः अस्माभिः सकुतूहलं परिशीलितः। अन्नदानविषये अन्नसम्पादनविषये च बहुभ्यः ग्रन्थेभ्यः बहूनि उपबृंहणवाक्यानि उपात्तानि। अयं परिश्रमः परिशोधकयोः विषयपौष्कल्यसाधने श्रद्धां बुद्धिनैशित्यं च व्यञ्जयति।

श्रुतिस्मृतिपुराणेतिहासेषु तत्र तत्र श्रूयमाणाः अन्नसम्बन्धिन्यः बह्व्यः सूक्तयः कथाः अत्र एकत्र क्रमेण पाठकानां दृष्टिपथे पतन्ति। मानवमात्रस्य बहुधा उपयोगि किल ! अन्नं भवति। अतः सर्वमानवसमुदायानाम् अवश्यं ज्ञातव्यं ननु अन्नं भवति। अतश्च प्राचीनवाङ्मयनिबद्धनानावाक्यश्लोककथासंग्रथनात्मकोऽयं ग्रंथः सत्यमेव समभिनन्दनीयतायाः चरमां कोटिमाटीकते।

आर्षवाङ्मये बद्धश्रद्धाः श्रद्धाविधुराः अपि जनाः ग्रन्थस्य अस्य सबहुमानं स्वागतं समुदीरयेयुरिति मन्यामहे। यतो ह्ययं ग्रन्थः प्राक्तनानां परमर्षीणाम् अन्नसम्बन्धिनीमखिलामपि विचारधारामेकत्र खलु निबध्नाति। अनेन च निबन्धेन प्राचीनपरमर्षिमेधासम्पत्तिर्ननु प्रकाशिता भवति। पूर्वे हि भारतीयाः न केवलमाध्यात्मिकभावनाप्रचारक्षेत्र एव कृतश्रमाः ! अपि तु प्रापञ्चिकभोगानुभूतिव्यवस्थाविषयेऽपि सुष्ठु प्रयतन्ते स्म।

आध्यात्मिकजीवनसरणिः अनुश्रियमाणा, अत्र परत्र चाऽपि आनन्दमभिमतम् अवश्यमेव सम्पादयतीति किल आर्यमिश्राणाम् अतिदृढः अध्यवसायः। आस्तिक्यबुद्धेर्यावता आघातप्रतिबन्धादिशङ्कैव नोदियात् तावान् वैषयिको भोगः सर्वासामपि व्यक्तीनां समनुमन्यते स्म 'अनिषिद्धसुखत्यागी पशुरेव न संशयः' इतीयं काचन प्राचीनसूक्तिरपि विषयेऽस्मिन् आलोकप्रसारमारचयति।

समीचीनजीवनविधानं समाजस्य साक्षात्कर्तुकामानां वैदिकवाङ्मयश्रद्धा-विधुराणामपि अन्नस्वरूपस्वभावोपयोगविनियोगादिकमवश्यमेव खलु विज्ञातव्यं विलसति, यतः तेऽपि सर्वे अन्नगतप्राणा एव समुपलभ्यन्ते। 'आहारशुद्धौ सत्त्वशुद्धिः' इति उपदिशन्ती औपनिषदी सरस्वती कस्य वा सहृदयस्य स्वान्तं नावर्जयति ? 'अन्नमयं हि सोम्य मनः' इत्यादीनि सूक्तिशतानि कस्य वा समालोचकस्य शीर्षं सबहुमानं नो कम्पयति ?

सत्यामेव खलु मनश्शुद्धौ परिशुद्धा भावनाधारा परिवहति, या किल प्रतिव्यक्ति-भासमाना समाजस्य सत्यसाक्षात्कारिसमीचीनमार्गसञ्चारे साहाय्यकम् आरचयति। अतः मानवमात्रस्य जीवनसौष्ठवसम्पादने मुख्यसाधनभूतस्य अन्नस्य विज्ञानसर्वस्वमिव विभ्राजमानोऽयं निबन्धः सर्वेषामप्युपकारकः उपादेयश्चेति दृढमभिधातुं शक्यते।

अन्नं हि नाम धनकनकवस्तुवाहनाद्यपेक्षया मर्त्यस्य संपूर्णां संतृप्तिं जनयति। यदि पर्याप्तमन्नं प्रजाः लभेरन् तर्हि पारस्परिकहिंसास्तेयदौर्जन्यादिसङ्घविद्रोहकार्यकलापप्रवृत्तेः विरता भवेयुः विश्वशान्तिश्च प्रपञ्चे सुस्थिरा विराजेत। अतः अन्नक्षेत्राणि न कुत्रापि यन्त्रस्थापनक्षेत्ररूपेण वा आवासक्षेत्ररूपेण वा परिवर्तितानि भवेयुः। आवासादिकृते अन्नोत्पादक-क्षेत्रेभ्योऽपि, अन्यानि ऊषरक्षेत्राणि उपयुञ्जेरन्। तेन वर्तमानकालोत्पाद्यमानाहारापेक्षया अधिकान्नं सम्पादितं भवेत्। एवं बह्वन्नप्राप्त्यै अन्नदानकूटान्यपि तत्र तत्र स्थापनीयानि भवन्ति, तदा प्रजानां सर्वासां जठरभरणापेक्षितपर्याप्तप्रशस्तान्नप्राप्तिः, ततश्च विश्वशान्तिः अवश्यमेव विजृम्भेत सर्वथा।

अन्नदानव्रतिभिः कृपालुभिः कैश्चन महात्मभिः बह्व्यः धर्मशालाः निर्मिताः, तन्निर्वहणाय महान्ति क्षेत्राणि धनानि च दत्तानि। भारतदेशे सर्वत्र ग्रामेषु पत्तनेषु नगरेषु च अद्यापि धर्मशालाः निर्वाह्यन्ते। अयमंशः अस्माकं सुविदित एव।

परस्सहस्रं वर्षाणि घोरं तपस्तप्त्वा अनन्तरं यदृच्छालब्धं यत्किंचिदपि अन्नं क्षुधातुरेभ्यः अर्थिभ्यः दत्वा अभुक्त्वा अपीत्वा च पुनः तपश्चर्यायै प्रवृत्तान् भारतीयान् ऋषीन् प्रति शृणुमः। स्वार्जितमन्नं अतिथिभ्यो दत्वा उपोषितवतीं भारतीयगृहिणीं संस्मरामः। श्येनस्य

क्षुधाशान्तये स्वशरीरमांसं दत्वा कपोतं ररक्ष शिबिचक्रवर्ती इति गाथा अस्माकं स्मृतिपथं न जहाति। स्वगृहमागताय निजभार्यां कपोतीं गृहीतवते व्याधाय स्वमेव शरीरमन्नतया दत्तवन्तं कपोतं महात्यागिनं मन्यामहे।

अहो कालस्य विपर्ययः! किं ब्रूमः ? 'द्वारं द्वारम् अटन् भिक्षुः शिक्षत्येव न याचते। अदत्वा मादृशो मा भूः दत्वा त्वं त्वादृशो भव' इति। अन्नार्थी वा अन्यार्थी वा यदि कश्चन भिक्षुः द्वारमागतः सः मम हितमुपदेष्टुमागत इत्येव मन्तव्यं न तु भिक्षणायेति प्राचीनभावना अस्तु!

श्रीमतोः महाभागयोः जितेन्द्रबजाजुश्रीनिवासयोः महता परिशोधनेन निष्पन्नोऽयं ग्रन्थः, बह्वन्नोत्पादनबह्वन्नदानव्रतदीक्षितानां प्राचीनानां भारतीयानाम् औदार्यं निरूपयन् अद्यतनानां भारतीयानां मार्गं दर्शयन् देशान्तरेषु च भारतीयानां दानशौण्डतां प्रथयतात् इति आशास्महे।

योयं कृतः प्रयत्नः अस्य ग्रन्थस्य प्रकाशने, स सर्वेषामपि समभिनन्दनीयतायाः समीचीनं पात्रं भवत्विति।

सीतानगरम्
१३.३.९६

अनेकानि मङ्गलानि आशास्महे
**जय श्रीमन्नरायण**

## ॥ श्री विश्वेशतीर्थ स्वामीजी ॥

### श्री पेजावर अधोक्षज मठ
### जगद्गुरु मध्वाचार्य संस्थान
### उडुपि

लोभदुराशाक्रान्तमानवकुलं प्रति भगवता ब्रह्मणा 'द' इत्युद्घोषणेन दानसंदेशः प्रदत्तः । दीयताम्, त्यागजीवनमुपादीयतामित्येवास्य सन्देशस्य सारः । परन्तु दानितायाः स्थाने दीनतामेव समाजजीवने सर्वत्र वयमिदानीं पश्याम इति सविषादमावेदयामः । दानकार्येऽपि अन्नदानस्य विशेषतः प्रशंसा शास्त्रेषु परिदृश्यते । 'अन्नस्य क्षुधितं पात्रम्' इति जातिवर्गभेदमतिक्रम्य क्षुधितसर्वजनसन्तर्पणं विधेयमिति शास्त्रं समादिशति ।

जनेषु असंविभज्य अन्येषामन्नवितरणमविधाय केवलमेकः यदश्नाति स पातकपिण्डमेव भुङ्क्ते इति भगवता कृष्णेन उद्घोषितम् । अन्नदानस्य एतादृशं महिमानं विविधग्रन्थपरिशीलनेन विशदीकुर्वत्पुस्तकमिदं सादरं समभिनन्दामः । अनेन समुचिता सामाजिकजागृतिः सम्पद्यतामित्याशास्महे ।

तिरुपतिः
२४.१२.९५

इति
**सप्रेम नारायणस्मरणानि**

## ।। विरक्त शिरोमणि श्री स्वामी वामदेवजी महाराज ।।

### अखिल भारतीय सन्त समिति
### आनन्द कुटीर
### वृन्दावन

**श्रीगणेशाय नमः**

**अन्नं बहु कुर्वीत** इतिशीर्षकवत्पुस्तकं मयाऽवलोकितम्। यत् जितेन्द्रबजाज्श्रीनिवासाभ्यां महता प्रयत्नेन निष्पादितम्।

'अन्नं बहु कुर्वीत' इति तैत्तिरीयश्रुतिरप्यस्ति । अस्याः श्रुतेः कः अभिप्रायः ? अभिप्रायस्त्वयमेव प्रतीयते, यत् यदि अन्नं बहु स्यात् तर्हि तस्य दानमपि बहु स्यात्। बहुदानेन किं स्यात्। कोऽपि क्षुत्पीडितोऽशान्तो न स्यात्। यदा सर्वेऽशान्ता न स्युः, तदा सर्वेसुखिन एव भूत्वा जीवनस्य योऽर्थः तत्वजिज्ञासा तां प्राप्नुयुः । भोजनादिचिन्तारहितस्य शान्तस्य धर्माचरणे प्रवृत्तस्य शुद्धचित्तस्यैव तत्वजिज्ञासा जायते। तया च विचारे प्रवृत्तिः। तत्वविचारेण तत्वज्ञानं जायते । अत एवोक्तं भागवते 'धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते।' आपवर्ग्यस्य अपवर्गस्य मोक्षस्य साधनं तत्वज्ञानं, तस्य साधनस्य धर्मस्य अर्थः धनं प्रयोजनं न भवति अपि तु तत्वज्ञानमेव। ये दातारस्तेषामपि विविदिषा (तत्वजिज्ञासा) भवत्येव। एवं दानेन दातारो ग्रहीतारश्च कल्याणभाजनं भवन्ति। जीवनसाफल्यं च गच्छन्ति। दातॄणामपि जिज्ञासा (विविदिषा) जायते। अस्मिन्नर्थे 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति बृहदारण्यकश्रुतिरपि प्रमाणमस्ति।

अनेन पुस्तकविचारेण दानस्य यत् फलमवगतं तदपि लिख्यते । अन्नदानं साक्षात्प्राणदानमर्थात् जीवनदानमेवास्ति । जीवने सत्येव धर्मार्थकाममोक्षाणां चतुर्विध-पुरुषार्थानां साधनं सम्प्राप्तिश्च संभवति। एवं त्वन्नदानं परम्परया चतुर्विधपुरुषार्थदानमपि वक्तुं शक्यते। अत एव बुभुक्षितस्य भिक्षुकस्य चातिथेः भिक्षाधिकारिणः संन्यासिनो ब्रह्मचारिणो

ब्राह्मणस्य क्षुन्निवृत्यर्थमन्नाप्रदातुः धर्मशास्त्रेषु बहुधा निन्दा श्रूयते। शास्त्रवचनानि तु पुस्तकस्य प्रथमभागे समुद्धृतान्येव। यज्ञैर्देवानां प्रसादः। देवानां प्रसादेन वृष्टिद्वारा बह्वन्नोत्पत्तिः। उत्पन्नस्यान्नस्य देवानप्रदाय भोक्ता स्वशरीरं पुष्णाति तथा तपआदिसाधनबलात् स्वर्गलोकेऽपि गत्वा क्षुत्पीडित एव सन् स्वमांसमेव खादति। अतः अन्नदानस्य महान् महिमाऽस्ति।

आधुनिकतथाकथितसमाजवादस्यापेक्षया भारतीयैकशासकस्य शासने कीदृक् सुरम्यः समाजवाद आसीत् सोऽपि पुस्तके प्रदर्शितः। अयं समाजवादोऽपि अन्नादिदानेनैव चलति स्म। अस्य वर्णनं पुस्तकस्यान्तिमभागे तञ्जावूरराज्यप्रकरणे कृतम्। यत् पठित्वा हृदयं द्रवीभूतं भवति। यदा यातायातसमृद्धसाधनानि नासन् तदापि हिमालयं समारभ्य यावदिन्दुसरोवरमपि यात्राणां प्रवाहः आसीत्। सोऽपि अन्नदानस्यैव महिमा आसीत्। पुस्तकस्य अवलोकनेन प्रतिभाति यत् अन्नदाननिष्ठानामात्मबलमपि वर्धते तत् आत्मबलं यं विना परमात्मप्राप्तिर्न संभवति। यथा वदति श्रुतिरपि 'नायमात्मा बलहीनेन लभ्यः।'

किं बहुना। अधिकजिज्ञासया पुस्तकमेवावलोकनीयम् ॥ इति शुभम् ॥

वृन्दावनम्
१०.५.९६

विद्वदनुचरः
**परमहंस स्वामी वामदेवः**

श्रीः

श्री चन्द्रमौलीश्वराय नमः

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य
श्रीशङ्करभगवत्पादाचार्यपरम्परागत

## ॥ जगद्गुरु श्रीशङ्कराचार्य श्री जयेन्द्र सरस्वती स्वामिगल् ॥

### श्रीकामकोटिपीठमहासंस्थानम्
### काञ्चीपुरम्

अन्नदानात् तीर्थदानाच्च परं दानं नास्ति इत्येका प्राचीना श्रुतिः। केभ्यः अन्नं दातव्यम् ? 'अन्नस्य क्षुधितं पात्रम्' इति उत्तरं भवति। अन्नदानविषये प्रत्येकमेकमौन्नत्यं दृश्यते। इतरेषु दानेषु यः दानं लभते, सः पूर्णसन्तुष्टिम् अलंबुद्धिं च न प्राप्नोति। अन्नदाने तु यो दानमवाप्नोति सः उदरपूर्त्या यदा अन्नमश्नाति तदा 'सन्तुष्टोऽहम्', 'अलम् अलम्' इति चिन्तयति वदति च।

अन्नशब्दस्य तात्पर्यं 'आहारः' इति वक्तुं शक्यते। मनुष्यादारभ्य क्रिमिकीटपर्यन्तं सर्वे प्राणिनः अन्नेनैव (आहारेणैव) जीवन्ति। अन्नमेव प्राणिनां उत्पत्तिकारणम् इत्यर्जुनाय भगवता कृष्णेन गीतायां स्पष्टतया प्रोक्तं 'अन्नाद्भवन्ति भूतानि' इति।

**अन्नं बहु कुर्वीत** इति शीर्षकेदत्तं पुस्तकं दृष्ट्वा अत्यन्तं मोदामहे। चेन्नपुरीस्थौ श्रीयुतौ जितेन्द्र बजाज्, मण्डयं दोड्डमने श्रीनिवासश्च द्राविडहिन्द्याङ्गलभाषासु अन्नदानस्य महत्वं विस्तरेण लिखित्वा पुस्तकमिदं प्रकाशितवन्तौ। अस्मिन् पुस्तके अन्नदानस्य श्रैष्ठ्यं विशेषफलमित्यादयः उपनिषत्सु मनुधर्मशास्त्रे इतिहासपुराणेषु च दृश्यमानैः वाक्यैः तेषु तेषु विद्यमानाभिः काश्चिद्भिः आख्यायिकाभिश्च सम्यक् वर्णिताः।

अद्यत्वे खाद्यधान्योत्पत्तौ कृषौ धान्यरक्षणे तण्डुलादिपरिणमने च बहवः नूतनाः क्रमाः अनुस्रियन्ते। परं धान्यस्य हितमेध्यतारक्षणे न अवधीयते। बहुधान्योत्पत्तिः इत्येव लक्ष्यं दृश्यते।

परं पूर्वैः कृषौ धान्योत्पत्तौ धान्यरक्षणे वितरणे अन्नदाने धर्म्यः आरोग्याय हितः मार्गः आदृतः बहुधान्योत्पत्तिविषये जागरुकैः। स श्रेयोवहः दैर्घकालिकलोकहिताय प्रभवति।

अस्य पुस्तकस्य पठनेन अन्नदानं प्रति पूर्णं ज्ञानं लभ्यते। भारतदेशीयै : सर्वैःपुस्तकमेतद् अवश्यं पठनीयं, यावत् शक्यं तावत् अन्नदानमपि कर्तव्यं इत्याशास्महे।

काञ्चीपुरम्
३१-७-१९९५

**नारायणस्मृतिः**